# सर्वोत्तमपरिपाटिः-2

**7.2.1.**

## विश्वविद्यालये छात्राणाम् आद्यन्तः संस्कृतमयपरिवेशः।

### 7.2.2. परिपाटेः उद्देश्यानि

**मातरं सर्वभाषाणामाश्रयामात्मसंविदाम् ।**

**वेदशास्त्रकलाधारामीडे वाचं दिवौकसाम् ।।**

सुव्यक्तमेव तत्र भवतां विपश्चिल्लोकद्युमणीनां यदियं सुरभारती सकलभुवनश्रेयस्कारितया मुनिभिरन्वाख्यातेति । तदीयसुधाधारां पायं पायं परमनिर्वृतिपदमधिवसन्ति जगन्ति ।

यथा परमास्वाद्यत्वात् वागियं विचित्रा, तथैव धारावैतत्यादपि नितान्तमियं विलक्षणा । आदौ संहिताब्राह्मणारण्यकोपनिषत्तदङ्गभाष्यादिमुखेन वैदिकी, ततः काव्यशास्त्रकलाविज्ञानादिवैचक्षण्यात् लौकिकीति द्विविधां कोटिमापद्यते ।

सर्वानिप लोकान् पावयितुमवतीर्णा सुरवचोमन्दाकिनीयं “ रामादिवद्वर्तितव्यं न तु रावणादिवदिति ” सर्वःश्रेयःप्रेयोभूमिमुपदेशमुपलम्ब्य चतुःषष्टिकलासु अन्यतमां काव्यकलाम् आद्रियमाणा सचेतश्चेतोभुवि नित्यमुल्लसतितराम् ।

एवं वैदिकलौकिकविधया द्वैविध्यमापद्यमानां संस्कृतसुरसरस्वतीं सर्वेषां देशकालवयोजात्यादिभेदान् अविगणय्य विद्यार्थिनां कल्याणाय अध्यापयितुमेव

विश्वविद्यालयेऽस्मिन् सदा सर्वत्र सकलकर्मसु तन्मयव्यवहाररूपा इयमुत्तमा परिपाटिः प्राधान्येन अत्र विस्तरेण समुपस्थाप्यते ।

## 7.2.3. सन्दर्भः

**अस्याः सर्वोत्तमायाः संस्कृतमयत्वपरिपाटेः रूपरेखाविनिर्माणे सान्दर्भिकाणि विशिष्टलक्षणानि निरूपणीयानि चेत् –**

अस्मिन् विश्वविद्यालये प्राक्-शास्त्री (Intermediate level),शास्त्री (UG level), आचार्यः (PG level)एतेषु त्रिषु स्तरेषु पुनश्च विशिष्टाचार्यः (M.Phil.), विद्यावारिधिः (Ph.D.)इत्याद्यनुसन्धानस्तरेऽपि सर्वत्र संस्कृतमेव प्राधान्येन आश्रियते ।

एवमेव प्रवेशादारभ्य (Admission), समावर्तनम् (Convocation)यावत् कार्यालये छात्रावासे क्रीडासु प्रीतिभोजेषु समावेशेषु कक्षासु सङ्गोष्ठीषु सर्वथा प्रातरारभ्य रात्रिपर्यन्तं सर्वेषां मुखात् केवलं संस्कृतमेकमेव मूलाधारतया सर्वैराध्रियते ।

**अस्याः परिपाटेः क्रियान्वयने सान्दर्भिकानि विशिष्टानि लक्षणानि निरूपणीयानि चेत् –**

अनेन विश्वविद्यालयेन उद्घोषितेषु विविधपाठ्यक्रमेषु ये छात्राः प्राथम्येन प्रविशन्ति, ये च संस्कृतं सुतरां न जानन्ति अथवा ईषत् जानन्ति तेषां सर्वेषामपि तत्तत् स्तराधारेण भाषाबोधनवर्गः भाषाविकासवर्गः शिक्षकप्रशिक्षणवर्गः इत्यादिषु नैकवर्गेषु संस्कृतं यथा दैनन्दिनव्यवहारे भाषितुं शक्येत तथा अध्याप्यते । पश्चात् न केवलं छात्राणाम्, अपि तु सामाजिकानामपि संस्कृतं यथा दैनन्दिनव्यवहारयोग्यं स्यात्, तथा सम्पादनाय दशदिनशिबिराणि बालकेन्द्राणि शास्त्रार्थप्रशिक्षणवर्गाः सञ्चाल्यन्ते ।

**अस्याः परिपाटेः रूपरेखाविनिर्माणे क्रियान्वयने च स्पर्धाह्वानानि निरूपणीयानि चेत् –**

संस्कृतस्य उज्ज्वलपरम्परायां नैकानि शास्त्राणि अत्र समुल्लसन्ति । विश्वविद्यालयेऽस्मिन् संस्कृतविज्ञानस्य प्राधान्यात् वेदभाष्यम्, व्याकरणम्, धर्मशास्त्रम्, पुराणेतिहासः, आगमः, ज्योतिषम्, अद्वैतवेदान्तः, द्वैतवेदान्तः, विशिष्टाद्वैतवेदान्तः, न्यायः, मीमांसा, साङ्ख्ययोगः, शाब्दबोधः, साहित्यम्, सङ्गीतकलाभिनयः, अनुवादः, अनुसन्धानप्रकाशनम्, शिक्षाशास्त्रम् इत्यादिना विज्ञानस्य नैकरूप्यात् अष्टादश संस्कृताधृताः विभागाः सन्ति । संस्कृतमानुषङ्गिकतया आद्रियमाणाः विभागाः हिन्दी, तेलुगु, आंग्लम्, चरित्रम्, गणितम्, सङ्गणकम्, क्रीडा इति नाम्ना सप्त सन्ति ।

एतेषु पञ्चविंशतिविभागेषु समधिकप्राधान्येन संस्कृतमेव मूलमिति हेतोः अस्मिन् विश्वविद्यालये प्रयोगदिशा प्रक्रियावर्त्मनि च सर्वविधसंसाधनानाम् ईषन्मात्रया उपलब्धिः जाता चेदपि ततोऽपि उत्तमतया अत्र गुणोत्कर्षम् अभिवर्धयितुं संसाधनानि महन्ति कल्पनीयानि इति निवेदनम् ।

## 7.2.4. परिपाटिः

**भारतस्य उच्चतरशिक्षासन्दर्भे परिपाटेरस्याः वैशिष्ट्यम्**

संस्कृतं भारतस्य मूलाधारः। भारते या संस्कृतिः मान्यताः विश्वासाः विधयः पदङ्कुर्वन्ति, तेषां सर्वेषामन्तरङ्गे संस्कृतस्य सत्तैव सर्वथा समुन्मीलति । भारतात् संस्कृतं विवेक्तुं न केनापि शक्यते । यदि संस्कृतस्य भारतात् विवेकः एव क्वचित् जातस्तर्हि न तत्र भारतमवशिष्यते । भारतत्वहीनं न तज्जातु भारतमिव कथमिव सम्भाव्येत ?यथा कस्मिंश्चित् काये प्राणान्, मनसः संवेदनां संस्कारांश्च अपाकृत्य तदात्मना कायम् उत मनः दिदृक्षामहे चेत् तदूहितुं कथमिव भवति ? सकृन्मन्यन्तां मनीषिणः। एवमेव संस्कृतं तद्वैदिकम् उत लौकिकम् उभयमपि भारतस्य भारतत्वविधायकमेव नान्यत् ।

अतस्तादृशस्य प्राणतत्त्वस्य भारतसमाजे पुनरवस्थानं यथायोगं विधापयितुं कृतोद्यमा अस्मदीयेयं शैक्षिकसंस्था प्रारम्भादपि संस्कृतस्य नानाविधं विज्ञानं सर्वतोमुखेन निश्चयेण जनानां व्यवहारेषु विस्तारयितुं तत्कर्मणि नितान्तमभिनिविशते । अत्रत्याः आचार्याः अध्यापकाः तदेव लक्ष्यं मनसिकृत्वा स्वकीयेन अध्यापनकर्मणा छात्रान् अस्यां दिशि समुत्साहयन्ति । संस्कृतस्य सामाजिकतासम्पादनार्थं विश्वविद्यालयेन अस्मदीयेन प्राचोऽपि अनुष्ठीयमानाः कार्यकलापाः इमे भवितुमर्हन्ति ।

- विश्वविद्यालयेऽस्मिन् ये च कर्मचारिणः शिक्षणेतरकर्मणि प्रवर्तमानाः सन्ति, तेष्वपि संस्कृतभाषणादिसंस्कारान् उन्नेतुं प्रतिवर्षं केचन विलक्षणाः उल्लासकारिणः कार्यक्रमाः आयोज्यन्ते, तत्र शिक्षणेतरकर्मिणोऽपि मनसि संस्कृतं प्रति प्रकृत्या जातप्रीतयः सन्तः स्वयमेव तद्भाषणश्रवणकवनादिविधिषु स्वयमात्मनः व्यापारयन्ति ।
- सर्वतः प्रतिकलमपि विनातङ्कं श्रूयमाणेषु संस्कृतवाक्यश्लोकमन्त्रसिद्धान्तचर्चाप्रसङ्गेषु महान्तमुत्साहम् आलभमानाः नवीना अपि छात्राः अल्पतरकाले एव संस्कृतम् आभाषितुं कृतार्था भवन्ति । तदेव सत्यं द्रढयितुं विश्वविद्यालयेऽस्मिन् **नवमासगते पीठे नवशब्दो न विद्यते** इतीयं भणितिरन्वर्था भवति । यतो हि प्रत्यहं संस्कृतस्य व्यावहारिकं शब्दराशिं श्रावं श्रावं नवच्छात्रोऽपि नवमासेषु व्युत्पन्नो गीर्वाणवाण्यां कृतमतिर्भवतीति अस्याः सारांशः।
- विश्वविद्यालयस्यास्य आसमन्तान्मनसः समुल्लासकरः प्राकृतिकः वृक्षगुल्मलतावितानादि-वेष्टितः परिवेशः इह वसतां समेषामपि मनीषायां सहजां संस्कृतप्रीतिम् उद्भावयति । अत एव उभयसन्ध्यासु अह्नः प्रतिवेलमपि परिवर्तमानाः प्राकृतिकाः पतत्रिकलरव-तनुतरपत्रगुम्फन-सुमनोमनोमोदिपरिमल-मृदुतरारुणरजोविकीर्णवर्त्मादिविलासाः इह संस्कृतमयं प्रातिस्विकं जीवनमाधातुं क्षमाः सन्ति ।
- प्रतिपदमपि पुण्यतपोवनच्छविमातन्वानेऽस्मिन् विश्वविद्यालये पूर्वस्मादपि सम्प्रति यावत् ये कार्यक्रमाः सुसंवृत्ताः वर्तमानाश्च सन्ति । तेषु सर्वत्रापि संस्कृतस्य प्रतिष्ठा प्रधाना भवति । तत्र मुख्यातिथिपदम् अध्यक्षपदं विभूषयितारः नानामठाधीशाः नानाशास्त्रधुरीणाः धीमन्तः विविधकलाकुशलाः

आचार्याः स्ववचोभिः पारिषदेषु संस्कृतशास्त्राणि प्रति श्रद्धां निष्ठां च उद्भावयन्ति ।

- विश्वविद्यालयस्यास्य कुलाधिपति-कुलपतिपदेषु नियुक्ताः महानुभावाः सदापि अस्यानुष्ठानस्य मौलिकं लक्ष्यं सिसाधयिषवः एव प्रतिकलं प्रत्युत्पन्नचेतस्काः सन्तः कर्मठा अभवन् भवन्ति च ।

**अत्र अभिमुखीकृताः अवरोधाः/सीमानश्च**

वैदिकपाठशाला केन्द्रीयसंस्कृतविद्यापीठ-मानितविश्वविद्यालयादिनानाविधान् स्तरान् अधिगम्य सम्प्रति केन्द्रीयविश्वविद्यालयत्वेन समुद्घोषितः सुप्रतिष्ठितोऽयं विश्वविद्यालयः गतात् षष्ट्यधिकवर्षकालात् नित्यं प्रवर्तमानः समाजात् पुनः सर्वकारात् क्वचिदनुकूलतां क्वचित्तदितरां च स्थितिम् अभिमुखीकुर्वाणः सम्प्रति ईदृशीम् अवस्थाम् आपद्यते । समाजे प्रान्तीयभाषाणां प्रागल्भ्यात् न्यूनया ज्ञानेच्छया अधिकया उपाधिप्राप्तीच्छया समवेतानां छात्राणाम् आधिक्यात् क्वचित् तादृशीं लक्ष्यसिद्धिं न साधयति, यादृशी अभिलषितासीत् ।

संस्कृते शास्त्राणां विज्ञानस्य च यत्नसाध्यत्वात् सुगहनत्वात् च सुकुमारमतयः छात्राः न तत्र सुखेन विहरन्ति । साम्प्रतिककाले साङ्केतिकविज्ञानस्य प्राबल्यात् सुखेनैव सर्वार्थस्य प्रेप्सितत्वात् तेऽपि नात्र श्रान्तिमाधातुम् ईहन्ते । परन्तु पर्याप्तसंख्यया सम्प्रत्यपि सत्त्वप्रकृतिकाः कर्मठाः विद्यार्थिनः सन्त्येव ।

जनानां हृद्यभाषात्वेन संस्कृतस्य प्रतिष्ठापनाय विश्वविद्यालयोऽयं चिरादपि कृतनिश्चयोऽपि साफल्ये सुविपुले समुपार्जिते सत्यपि सम्प्रति समाजे प्रत्यक्षस्तोतारः परोक्षे स्वविषयरताः जनाः स्युरित्यतः अभिलषितसाफल्यस्य ईषदन्तरेण प्राप्तावपि प्राप्तव्यमितोऽपि कर्तव्यसीम्नि महदस्तीति विद्मो वयम् ।

## 7.2.5. परिपाटेरस्याः साफल्यस्य प्रमाणानि

**परिपाटेरस्याः उत्कृष्टगुणमानानां निर्धारितलक्ष्याणां च प्राप्तये कार्यनिष्पादनम् –**

अनुष्ठानेन अनेन प्रगते अर्धशतमानकाले यत् लक्ष्यं संस्कृतस्य उज्ज्वलं वैज्ञानिकं स्वरूपं समाजे सर्वतः संस्थापनीयम्, तदस्य संसाधनाय गुणवरीयसां नानाशास्त्रपारीणानां विचक्षणानां विपुलधियाम् आचार्याणां सम्मर्शैः उत्तमाः पाठ्यकलापाः तत्तच्छास्त्रेषु निर्धारिताः। विश्वविद्यालये अध्ययनाध्यापनवेलायां काचिदनूचाना परम्परा संरचिता । यया च छात्राः श्रद्धया स्वस्वविषयेषु महतीं प्रज्ञाम् आर्जयितुं शक्ताः स्युः। कार्यनिर्वहणप्रणाल्यां प्राकृतिकपरिवेशविषये च सर्वत्र संस्कृतस्य आचारविचारविधिरेव समुपकल्पितः। अनेन दिवानिशं संस्कृतस्य सौरभं मनसि आलभमानैः छात्रैः महत्फलं स्वार्ज्यमेव ।

**तत्र समार्जितं साफल्यं पुनरीक्षापरिणामाश्च –**

विश्वविद्यालयेऽस्मिन् प्रारम्भात् प्रतिवर्षमपि छात्राणां स्वस्वशास्त्रेषु अधिगमपरिपाकः सुशोभन एव । नानास्पर्धासु सङ्गोष्ठीषु एकपात्र-सामूहिकनाटकेषु सङ्गीतकलाभिनयेषु क्रीडादिविधिषु सर्वत्रापि समुन्नतं फलं समुपार्जयितुं छात्राः अस्मदीयाः सर्वथा कृतोद्यमाः भवन्ति एव। अतः उत्कृष्टगुणमानानां पुनरीक्षापरिणामः सर्वथा अत्र साफल्योन्मुख इति निश्चप्रचः।

संस्कृतमयतायाः सर्वतः समुत्कर्षात् प्राप्तानां परिणामानां पुनरीक्षणेन इमानि साफल्यस्थानानि वेत्तव्यानि भवन्ति ।

- प्रतिवर्षमपि संस्कृतगवेषणक्षेत्रे नानाविधान् शास्त्रविज्ञानांशान् अधिकृत्य शोधकर्मणि श्रद्धावतां छात्राणां संख्याधिक्यम् ।
- विश्वविद्यालयस्य सर्वविधेषु स्तरेषु स्पर्धासु सङ्गोष्ठीषु पुनश्च भारते भारतात् बहिरपि विविधसन्दर्भेषु विविधैरनुष्ठानैः आयोजितेषु नानाकार्यक्रमेषु अत्रत्यानां छात्राणां स्वप्रतिभाप्रदर्शनेन स्वर्णपदकादिसम्मानैः विजयोत्सवः।
- **यू.जी.सी.** द्वारा प्रतिवर्षं द्विरायोज्यमाने परीक्षाप्रसङ्गे ऐहिकानां छात्राणां सर्वथा साफल्यप्राप्तौ अग्रगामिता सुपरिचयैव ।
- अत्र अधीयानानां छात्राणां प्रतिभाप्रकर्षेण भारतस्य नानादिक्षु प्रथितेषु अनुष्ठानेषु नियुक्तिः प्रशस्ततया दृश्यतेतराम् । पुनश्च **इस्रो, एस्.बी.आई.**

इत्यादिबहुलप्रयोजकेषु संस्थानेष्वपि तत्तद्विषये सुपरिचितत्वात् अत्रत्यानाम् आचार्याणां सेवाप्रदानं सुविदितमेव ।

**एते परिणामाः किं प्रथयन्ति इति चेत्–**

ईदृशेन प्रशस्तेन विविधगुणगणविभूषितेन कार्यशैलीप्रसङ्गेन विश्वविद्यालयस्यास्य गुणोत्कर्षः कार्यकरणसामर्थ्यञ्च सुशकमिति सप्रमाणं निर्धार्य इयं विजयपरम्परा अग्रेऽपि इतोऽधिकेन उत्साहेन चातुर्येण च प्रवर्ततां प्रवर्धताम् इति शुभाशयः एव अत्र सत्परिणामानां सूचनेति नो मतिः।

## 7.2.6. अभिमुखीकृताः समस्याः आवश्यकानि संसाधनानि च

**अभिमुखीकृताः समस्याः –**

एतावति सुविपुले अस्मद्विश्वविद्यालयस्य कार्यानुभवकाले महत्यः समस्याः समये समये अभिमुखीकृताश्चेदपि अत्रत्यानां कर्मचारिणाम् आचार्याणां सहयोगेन सहकारेण च अधिष्ठानस्य महत्या कार्यदीक्षया च ताः उत्तीर्णाः। अग्रेऽपि अनेनैव वर्त्मना इमाः अधिगमिष्यन्त इति नो विश्वासः।

**आवश्यकानि संसाधनानि –**

पूर्वार्जितेन साफल्येन असन्तुष्टैरस्माभिः इतोऽधिकं बहुगुणितं साफल्यं समुपार्जितुम् अपेक्षितं समर्थञ्च संसाधनजातमत्र अन्यूनानतिरिक्ततया प्रस्तूयते ।

- ✓ विश्वविद्यालयेऽस्मिन् सर्वविधस्तरेषु विद्यमानानां छात्राणां प्रक्रियाप्रयोगविधिसापेक्षं कक्षाप्रकोष्ठाः प्रयोगशालाश्च उपयुक्ताः सभागाराश्च अपेक्षिताः।
- ✓ अग्रिमकाले नूतनपाठ्यक्रमाणाम् अभिनवाभ्यासविधीनां च आविष्कारस्य सम्भावना भवतीत्यतः पूर्वापेक्षया अधिका संसाधनसामग्री अत्र नियतं स्थापनीया, पुनः पर्यवेक्षणीया च ।
- ✓ विश्वविद्यालयेऽस्मिन् आचार्याणां गवेषकाणां च प्रतिभायां महत्यां सत्यां महान्तः परिकल्पाः अत्रापेक्षिताः स्युः।

- ✓ प्रतिस्तरमपि प्रतिविभागं परीक्षानिर्वहणाय प्राप्तज्ञानस्य प्रायोगिकपर्यनुशीलनाय सुसमृद्धाः प्रयोगशालाः नियतम् अपेक्षिताः।

**निष्कर्षः-**

इत्थं सर्वतोमुखेन विचारेण परिपाटेरस्याः अनुस्यूततया निर्वहणाय अभिवर्धनाय च यथासम्भवं यथान्यायं च सहकारः मार्गोपदेशः लभ्यत इति विश्वासेन अत्रोपरम्यते ।

•※•

# राष्ट्रियसंस्कृतविद्यापीठम्

(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्विवद्यालयः)
राष्ट्रियमूल्यायनप्रत्यायनपरिषदा 'ए' श्रेण्यां पुनः प्रत्यायितम्
विश्वविद्यालयानुदानायोगेन पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितम्

**तिरुपतिः - ५१७ ५०७ (आन्ध्रप्रदेशः)**

# परिचायिका

**प्रवेशनियमावलिश्च**




# RASHTRIYA SANSKRIT VIDYAPEETHA

(Established under section 3 of UGC Act, 1956)
*Re-Accredited with 'A' Grade by NAAC and UGC Centre of Excellence for Traditional Sastras*

**TIRUPATI - 517 507 (Andhra Pradesh)**

# PROSPECTUS
# &
## ADMISSION RULES 2016-17

**Website : www.rsvidyapeetha.ac.in**

## महाकविमाघविरचितं शिशुपालवधम् - प्रथमभागः द्वितीयभागश्च




सरलव्याख्याता - डा. सि.एच्. नागराजः

सम्प्रति संस्कृतजगति हिन्दीव्याख्यानेन क्वचित् प्रान्तीयभाषाव्याख्यानैः आङ्ग्लविवरणेन च बहवः अपि माघकाव्यस्य ग्रन्थाः लभ्यन्त एव । तेषु सत्सु प्रस्तुतव्याख्यानस्य का अपेक्षा ? इति प्रेक्षावतां भवतां मनस्सु निर्विरोधं प्रश्नः कश्चित् जायेत । तदुत्तरमिदं यत् 'संस्कृतमाध्यमेन अधीयानानां छात्राणां जिज्ञासूनां संस्कृतप्रणयिनाम् अपि प्राथमिकस्तरादेव सरलसंस्कृतव्यवहारेण ग्रन्थानां पठनपाठनपद्धतिरारब्धव्या' इत्यस्माकं विश्वविद्यालयाधिष्ठानस्य मङ्गलमयः कश्चन सङ्कल्पः । इयता कालेन पञ्चमहाकाव्यानां वैदुष्योपेताः व्याख्यानग्रन्थाः बहवोऽपि सन्ति । तेषाम् अवगमने किञ्चिदिव कष्टम् अनुभवन्ति प्राथमिकाध्येतारः । प्राथमिकाः वा माध्यमिकाः वा छात्राः जिज्ञासवः सर्वेऽपि सुखेन काव्यमिदं स्वयमधीत्य यथा अवगच्छेयुः, तद्दिशैव कुलपतिवर्यैः मुरलीधरशर्ममहाशयैः निर्धारितां प्रणालीम् आश्रित्य पञ्चमहाकाव्यानाम् अपि व्याख्यानारम्भः संवृत्तः । तस्मिन्नेव क्रमे माघकाव्यस्य अपि इयं व्याख्या प्रणीता वर्तते ।




काव्यस्यास्य सुखावबोधाय प्रतिपदमपि जागरूकतया प्रणाली इयं समाश्रिता । यथा भूमिकायाम् अस्य काव्यस्य सम्बन्धी सङ्क्षिप्तः इतिहासः, माघकवेः वैदुष्यपरिचायकः लघुतरः उपोद्घातश्च प्रदत्तः । सर्वेषां विंशतिसर्गाणामादौ तस्य तस्य सर्गस्य सङ्क्षिप्तः कथासारः सरलसुन्दरसुमधुरशैल्या प्रस्तुतः । येन तत्सर्गस्य अध्ययनात् पूर्वमेव तदन्तर्गता कथा अपि सुखेन ज्ञायेत । ततः सर्वेषु सर्गेषु विद्यमानानां श्लोकानां व्याख्यानम् एवंक्रमेण उपस्थापितं वर्तते । यथा तत्र श्लोकानाम् आदौ अपेक्षितस्थलेषु अवतारिकाः निर्दिष्टाः। प्रतिश्लोकमपि श्लोकगतानां पदानां विच्छेदः, अन्वयः, प्रतिपदार्थः, भावार्थः एवम् अपेक्षितस्थलेष्वेव विशेषव्याख्या अपि सन्निवेशिताः । एतैः उपायैः भवन्तः श्लोकान् पठन्ति चेत् तेषां भावं जानन्ति एव, ततोऽपि अज्ञातपदानाम् अर्थमपि सुखेन वाक्यप्रयोगपुरस्सरं सम्यग् अवगच्छन्ति च । सर्गान्ते तदन्तर्गतानां सुभाषितानां लोकोक्तीनां च आवलिः निर्मिता। सम्पूर्णकाव्यस्य व्याख्यानसमाप्तेः परं पञ्चश्लोकात्मकः कविवंशपरिचयः अपि पूर्ववदेव व्याख्यातः । एवमस्य महाकाव्यस्य व्याख्यानमिदं परिसमाप्तम् ।




शिशुपालवधस्य भागद्वयं विमोच्य व्याख्यातॄन् डा. सी.एच्.नागराजमहोदयान् सम्मानयन्तः मान्याः अतिथयः भद्रेशस्वामिचरणाः कुलाधिपतयः कुलपतयः कुलसचिवाः संकायप्रमुखाश्च ।

# त्रयोविंश: दीक्षान्तसमारोह:

श्रीविकारिनामसंवत्सरे माघ-शुक्ल-अष्टम्यां रविवासरे पूर्वाह्णे १०.०० वादने

02.02.2020

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

(मानितविश्वविद्यालय:)

राष्ट्रियमूलमूल्याङ्कनप्रत्यायनपरिषदा ''ए'' श्रेण्या पुन: प्रत्यायिता:
विश्वविद्यालयानुदानायोगेन प्रथमवर्गीयमानितविश्वविद्यालयत्वेन परिगणितश्च

## सम्मानोपाधिसमर्पणम्

### महामहोपाध्याय:

आचार्या: आर्. सुन्दररामवाजपेययाजिमहोदया:

आचार्या: समुद्राल वेङ्कटरङ्गरामानुजाचार्युलुमहोदया:

आचार्या: अद्यपाडि हरिदासभट्टमहोदया:

आचार्या: श्रीपादसुब्रह्मण्यम् महोदया:

### वाचस्पति:

आचार्या: बेतवोलु रामब्रह्मं महोदया:

विद्वांस: जनार्दनहेगडेमहोदया:

डा. एच्. आर्. विश्वासमहोदया:

आचार्या: पेन्ना मधुसूदनमहोदया:

# त्रयोविंश: दीक्षान्तसमारोह:

श्रीविकारिनामसंवत्सरस्य माघ-शुक्ल-अष्टम्यां रविवासरे पूर्वाह्णे 10.00 वादने

दिनाङ्कः - 02-02-2020

## राष्ट्रियसंस्कृतविद्यापीठस्य त्रयोविंशे दीक्षान्तसमारोहे कुलपतीनाम् आचार्य वि. मुरलीधरशर्ममहाभागानां स्वागतभाषणं विवरणञ्च

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

(मानितविश्वविद्यालय:)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ''ए'' श्रेण्या पुनः प्रत्यायितः

विश्वविद्यालयानुदानायोगेन प्रथमवर्गीयमानितविश्वविद्यालयत्वेन परिगणितश्च

**RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI**

**(Deemed to be University)**

**NAAC Re-Accredited with CGPA of 3.71 on 4 point scale at 'A' Grade**

**Declared as 1st category Deemed University by the University Grants Commission**

# त्रयोविंश: दीक्षान्तसमारोह:

श्रीविकारिनामसंवत्सरस्य माघ-शुक्ल-अष्टम्यां रविवासरे पूर्वाह्णे 10.00 वादने

दिनाङ्क: - 02-02-2020

महामहोपाध्यानां भारतनिर्वाचनायोगस्य मुख्यनिर्वाचनायुक्तचराणां
पद्मभूषणोपाधिसम्मानितानां राष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतीनां

## श्री नीडामङ्गलं गोपालस्वामिमहोदयानाम्

## आध्यक्ष्यं भाषणम्

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

(मानितविश्वविद्यालय:)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ''ए'' श्रेण्या पुन: प्रत्यायित:
विश्वविद्यालयानुदानायोगेन प्रथमवर्गीयमानितविश्वविद्यालयत्वेन परिगणितश्च

**RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI**

**(Deemed to be University)**

**NAAC Re-Accredited with CGPA of 3.71 on 4 point scale at 'A' Grade**

**Declared as 1st category Deemed University by the University Grants Commission**

७. विद्यापीठेन **श्रीमद्-भगवद्-रामानुजाचार्याणां सहस्राब्दिसन्दर्भे** भारतसर्वकारस्य सांस्कृतिक-मन्त्रालयस्य अनुदानेन प्रकल्पितायां परियोजनायाम् उत्कृष्टानां पञ्चदशग्रन्थानां प्रकाशनं क्रियते। अस्यां योजनायां दुर्लभताळपत्रग्रन्थानां सङ्गणकानुगुणाङ्कीकरणं (Digitization), सम्पादनं प्रकाशनं च प्रचलति । विद्यापीठस्य सामान्यशैक्षिककार्यैः सह पञ्चाशत् मातृकाणां सम्पादनं प्रकाशनं च विहितम्। इदमेव न पर्याप्तम्, इतोपि करणीयं बहु अस्ति। यावता अनुसन्धानपद्धतयः नानुस्रियन्ते तावता कस्यापि विश्वविद्यालयस्य प्रगतिः नैव सम्भवति इति अस्मिन् कर्मणि सर्वान् सङ्कायान् प्रबोधयामि ।

८. मम परामर्शानुसारं प्राशासनिकसेवासु छात्राणां साहाय्यं कार्यमिति विद्यापीठेन सङ्कल्पः कृतः यत्र पञ्चविंशतिः छात्राः पञ्जीकृताः । परमत्र इतोपि महान् प्रयासः करणीयः। अस्माकं छात्राः राज्यसर्वकारस्य केन्द्रसर्वकारस्य च विभिन्नस्तरेषु संस्कृतस्य उन्नतये पुरोगामिनो भवितुं कटिबद्धाः भवेयुः । अहं संस्कृतच्छात्रान् भवतस्सर्वानपि उद्बोधयामि यत् **प्राशासनिकसेवासु तत्पराः भवन्तु** इति ।

९. यद्यपि अस्माभिः बहुभ्यः वर्षेभ्यः नैकानि कार्याणि साधितानि तथापि गुणवत्तासम्पादनाय उपलब्धये च अस्माकं **श्रेणीमानाङ्कः** सर्वेषु भारतीयविश्वविद्यालयेषु **सर्वोच्चः** भवतु इति आशासे ।

**वर्धताम् अभिवर्धताम् ।**

**भवतां भावि उज्ज्वलं समृद्धं च भवतु ।**

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत् ॥**

**इति शम् ।**



# शेमुषी

# SEMUSHI

University News Letter

June to September - 2021

ॐ योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

International Day of Yoga
21 June
Yoga for Harmony & Peace

## 7th International Day of Yoga
## सप्तमः अन्ताराष्ट्रिययोगदिवसः

दिनाङ्कः - २१.०६.२०२१



सर्वेभ्यः देशवासिभ्यः सप्तमस्य अन्ताराष्ट्रियदिवसस्य शुभकामनाः विधाय योगसन्देशं कथयन्तः
मान्याः प्रधानमन्त्रिणः श्रीमन्तः नरेन्द्रमोदिमहोदयाः




राष्ट्रियसंस्कृतविश्वविद्यालये सप्तमः अन्ताराष्ट्रिययोगदिवसः समाचरितः ।
उद्बोधयन्तः मान्याः कुलपतयः आचार्याः वि.मुरलीधरशर्ममहोदयाः, उपस्थिताः कुलसचिवाः कमाण्डर् च. वेङ्कटेश्वरमहोदयाः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
NATIONAL SANSKRIT UNIVERSITY, TIRUPATI
A Central University established by an act of Parliament
(Formerly Rashtriya sanskrit Vidyapeetha, Deemed to be University)
Tirupati- 517507

भोः छात्राः ! संवत्सरपूर्वं जातो दीक्षाऽऽरम्भो ह्यस्तनजात इव अद्य दीक्षान्तं मिलतीति समयोऽयं कदा कथं क्व च सरतीति नैवाऽनुभूयते । तथाऽपि दीक्षान्तेऽद्य अवश्यं युष्माकं स्मृतिमञ्जूषायां नानाऽऽस्वादरमणीया मनोभावा भरिताः स्युरिति मन्ये।

प्रतिदिनं नूतनानां विषयाणां श्रवणम्, ततस्तन्मननं, गृहकार्यं, समये समये गृह्यमाणाः परीक्षाः, मनःस्थितिं दोलयन्तस्तत्परिणामाः, नूतनानां मित्राणां परिचयः, तैः सह सहजो वार्तालापः, क्वचिद् उत्साहः क्वचिद् औदासीन्यं,क्वचित् पुस्तकेषु प्रीतिः क्वचिद् विरतिः, क्वचिद् व्याकरणे वैरं, क्वचिद् न्याये नयनम्, कदाचित् खण्डनम्, कदाचिद् मण्डनम्, कदाचिद् रागः कदाचिद् रोषः, क्वचित् गानं क्वचित् नृत्यम्, क्वचित् चर्चा क्वचिद् मौनम्, क्वचित् क्रीडा क्वचिद् निद्रा, क्वचिद् भक्तिः क्वचिद् ध्यानम् इत्यादिबहुभी रूपैः, बहुभिः संवेदनाभिः भवद्धृदयानि अद्य संरसितानीति तु स्वाभाविकम्।

दीक्षान्तसमारोहोऽयं किम् अद्य पदवीं प्राप्स्यामीति हृदयाऽऽनन्दं वर्धयति, उत अध्यापकानां मित्राणां वियोगं प्राप्स्यामीति मनःपीडां जनयतीति वक्तुं नैव शक्यम् । अवश्यम् अद्यतनो मध्याह्नो भवतां कृते सुखदुःखसंमिश्रसंवेदनाऽऽवेदक इति ममाऽपि प्राक्तनोऽनुभवः ।

अयि भव्याश्छात्राः! बहुविधं खलु वो दायित्वमितः परम्। प्रथमं तावद् वैयक्तिकम्। ततः कौटुम्बिकम्। ततः व्यावहारिकम्। ततः सामाजिकम्। ततः वैश्विकमिति। स्वीयं स्वास्थ्यं रक्षत। मातुः पितुः भ्रातुः भगिन्याः इतरेषां च सम्बन्धिनां सेवां कुरुथ।

नूनं भवद्भिः एतादृशे महनीये विश्वविद्यालये विद्यां प्राप्य यशःश्रीः प्राप्तेति भाग्यवन्तो भवन्तः ।

अध्येतारस्तु भवन्ति चित्राणि, चित्रकारास्तु अध्यापकाः । जनाः खलु चित्रमेवाऽधिकं पश्यन्ति न चित्रकारम्। विद्यार्थिनो भवन्ति शिल्पानि, शिल्पकारास्तु शिक्षकाः । जनाः खलु शिल्पमेवाऽधिकं प्रशंसन्ति न तु शिल्पकारम्। तथापि चित्रादपि शिल्पादपि चित्रकारस्यैव शिल्पकारस्यैवाऽस्ति महत्त्वम्। अत इह चित्रकारनिभान्, शिल्पकारनिभांश्च अध्यापनरतान् उपकारिणः स्मर्तुमभिलषामि।

**अयि भव्या आचार्याः!**

भवद्योगदानमपीह स्मरणीयमविस्मरणीयं च । अध्ययनाऽऽनन्दसन्दोहे निमज्जद्भिर्भवद्भिः विद्यावारिधौ सर्वोऽपि अध्येतृगणः ज्ञानाऽऽनन्दाऽनुभूतिमानीत इति महान् भवदुपकारः ।

शिक्षकत्वं कदाऽपि नैव भवति साधारणम् । उत्पत्तिप्रलयौ खलु तत्क्रोडे क्रीडतः इति प्रौढानाम् उक्तिः भवदर्थमेव उच्चारिता ।

# महामान्यकुलाधिपतीनामाध्यक्ष्यभाषणसारः



दीक्षान्तसमारोहस्यास्य अध्यक्षाः महामान्याः कुलाधिपतयः पद्मभूषणोपाधिसम्मानिताः श्रीनीडामङ्गलं गोपालस्वामिमहोदयाः दीक्षान्तकार्यक्रमस्योद्घाटनमकार्षीत् । सन्दर्भेऽस्मिन् सर्वप्रथममस्य विश्वविद्यालयस्य केन्द्रीयविश्वविद्यालयत्वेन परिणमने समयसाध्यम् उपक्रमं कुर्वद्भ्यः विश्वविद्यालस्य अस्य कुलपतिभ्यः सहकारिभूतेभ्यः कर्मकरेभ्यश्च शुभाभिनन्दनं वितीर्य संस्कृतस्य साम्प्रतिकस्थितिं च प्रघटीकृत्य विश्वविद्यालयस्य बहुविधोन्नतिमूलककार्यक्रमान् अववर्णत् । यथा — "मान्याः संस्कृतशिक्षा सम्प्रति बहूनि प्रत्याह्वानानि सम्मुखीकरोति । तेषु धनस्य विषये प्रसिद्धं प्रत्याह्वानमस्त्येव । तत्र सार्थकानुसन्धनकर्मणि अस्माकं प्रयासः न अतिप्रशंसनीय इत्यंशोऽतीव मुख्यः । शोधविधिविज्ञानमपि विश्वस्तरीयप्रमाणेष्वस्ति न वेति अस्माभिः मापनीयमिति अपरोंऽशः । अस्माभिः कारणद्वयं निमित्तीकृत्य अस्मिन् विषये सावधानैः चिन्तनीयम् । एकं - राष्ट्रस्तरे विश्वविद्यालयस्य अस्य उत्कृष्टतायाः सम्पादनम् ; अपरम् — संस्कृतवाङ्मये उपलभ्यमानानां शास्त्रीयग्रन्थानां प्रेरितदुष्टव्याख्यानानि दृश्यन्ते, तेभ्यः व्याख्यानेभ्यः औत्साहिकान् पाठकान् परावर्त्य तेषां समीचीनायां व्याख्यानसरणौ स्थापनम् इति ।



प्रारम्भिकच्छात्राणामध्ययने साहाय्यहेतोः अस्माकं विश्वविद्यालयः मीमांसा-व्याकरण-साहित्यादिशास्त्रेषु सरलमानक- संस्कृतभाषया पाठ्यग्रन्थान् रचयतीति सर्वे जानन्ति । एतस्मिन् प्रयत्ने एतावता चत्वारः ग्रन्थाः प्रकाशिता तथा च वास्तु-ज्यौतिषयोः डिप्लोमापाठ्यक्रमः, आलयसंस्कृति-आलयप्रबन्ध-विषये मूक्सविधया (Massive Open Online Courses) पाठ्यक्रमः निर्मितः इति महतः प्रमोदस्य विषयः ।



प्राचीनसंस्कृतवाङ्मये उपलभ्यमानस्य प्रबन्धशास्त्रस्य तान्त्रिकविज्ञानस्य तर्कादिशास्त्रेषु उपलभ्यमानस्य न्यायादिविज्ञानस्य च विषये बहुलं कर्तव्याः भवन्ति । एते प्रयत्नाः एते च विषयाः छात्राणामुद्योगावकाशेषु उपकारकाः सम्भाव्यन्ते ।

छात्राणां प्रशासनसेवापदवीपरीक्षासु भागं ग्रहीतुमपेक्षितानि आनुकूल्यानि सम्पाद्यानि । परन्तु छात्राः एतासु परीक्षासु न उत्साहन्ते । सम्प्रति छात्रैः अध्यापकैश्च एतस्मिन् विषये दृष्टिः प्रसारणीया। अस्माकं छात्राः यथा निर्णयाधिकारवत्सु पदेषु भवेयुः तथा अस्माभिः प्रयतनीयम् । तानि च पदानि राज्ये वा केन्द्रे वा प्रशासनसेवापदानि वा न्यायव्यवस्थासेवापदानि वा भवन्तु । छात्राणाम् एतादृशपदवीप्राप्त्या न केवलं संस्कृतवाङ्मयस्य निरन्तरप्रोत्साहनमेव लभ्यते अपि तु संस्कृतवाङ्मये तालपत्रादिषु निक्षिप्तानाम् अनेकविज्ञाननिधीनां प्रकाशनाय साह्यमपि भवति ।

अस्माकं विश्वविद्यालयः अपि बहुभ्यः ग्रन्थालयेभ्यः विशिष्य पुदुच्चेरीस्थितायाः फ्रेञ्च्-संस्थायाः ग्रन्थालयात् बहूनि संस्कृत-भाषायां स्थितानि वैज्ञानिकतालपत्राणि सम्पादयितुं यतमानोऽस्ति । सर्वेषु विश्वविद्यालयेषु ईदृशाः अधिकाः प्रयत्नाः अत्यन्तम् आवश्यकाः । यदि वयममुं प्रयत्नमतिशीघ्रं न कुर्मः, तर्हि वैदेशिकाः पुरतः आगत्य एतेषां प्रतिकृतिं सम्पाद्य प्राचीनसंस्कृत-वाङ्मयफलानि अनुभोक्ष्यन्ति इति महान् वर्धमानः उपायः सम्भवति ।

गुणेषु यत्नः पुरुषेण कार्यः (An effort should be made by a man for virutes.)

SEMUSHI
# शेमुषी

Volume - XIV /ISSUE - 2 *Bi-monthly News Letter* MAY-NOV-2018

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा।। (ऋग्वेदः १०.८१.७)

***Let us, this day, invoke for our protection the Lord of Speech, the Creator of all, who is swift as thought; may He, the Bestower of all happiness, the doer of good works, be propitiated by all our oblations, (so as) to grant us his protection. (Rgveda 10.81.7)***



## राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः
## RASHTRIYA SANSKRIT VIDYAPEETHA

**(Deemed to be University)**
**Accredited with CGPA of 3.71 on 4 point scale by NAAC (Cycle-2)**
**Categorized in 1st Category among Indian Deemed Universities by the UGC**
**Tirupati, Andhra Pradesh**
**PIN - 517 507**

# नवदशदीक्षान्तसमारोहः

श्रीमन्मथ–माघ–कृष्ण–अष्टमी–सोमवासरे–पूर्वाह्णे १०.०० वादने

## कार्यक्रमविवरणम्

# 19th CONVOCATION

1-2-2016

10:00 a.m. to 12:30 noon

**Proceedings**

## RASHTRIYA SANSKRIT VIDYAPEETHA

(University established under section 3 of UGC Act, 1956)

NAAC Accredited & UGC Sponsored Centre of Excellence for Traditional Sastras

**TIRUPATI - A.P. 517 507**

## राष्ट्रियसंस्कृतविद्यापीठम्

(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)

विश्वविद्यालयानुदानायोगेन पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितम्

तिरुपतिः – ५१७ ५०७ (आं.प्र.)

गान्धी — प्रथमवारं सत्याग्रह आरभमाण आसीत् । तदानीमयं मे पुत्रः मणिलालः सेवामकरोत् ।

मणिलालः गान्धिनः पुत्रः – गृहे आर्द्रकमरीचिकादिकट्वौषधैरेव स्वयं रोगाद्विमुक्ता ।

वैद्यः – (साश्चर्यम्) एवं किमाधुनिकाः गुलिका न भुक्ताः ?

गान्धी — नैव । तत्र मदकारि वस्तु भवतीति सा जानाति ।

मणिलालः — जीवने मद्यं मांसं वा न खाद्यम् इति तातः सर्वदा उपदिशति ।

वैद्यः — एवम्, आश्चर्यं जायते, अस्माकं ते विना दिनमेव यापयितुं न पार्यते कथमिदं सम्भवति ?

गान्धी - अहिंसापरमः धर्मः इति विश्वसम्मतः सिद्धान्तः अस्माभिरनुष्ठीयते । तदेव बलम् ।

मणिलालः — एवमेव न, मधु अपि कदापि न सेव्यते ।

वैद्यः — कथं चिकित्सासमये अपि मधु न सेव्यते ?

गान्धी — चाहापानमपि अस्माभिर्वर्जनीयम् ।

वैद्यः – चाहापाने को दोषः ?

गान्धी — चाहापानमपि मदं जनयति ।

मणिलालः — प्राणाः निर्गच्छन्तु नाम चाहापानं वा अन्यमादकद्रव्यं वा कदापि न सेव्यते ।

गान्धी — इदं मे मतम् । तदेव अनुतिष्ठेद् भार्याऽपि इति मदाग्रहः ।

कस्तूरिबा — (असह्यवेदनां नाटयन्ती) हा हताऽस्ति मन्दभाग्या अनामयः बहु बाधते । नाहं सहेय । (छीत्कारं करोति)

*(अत्रान्तरे गान्धिनः द्वितीयपुत्रः रामदासः प्रविश्य स्यूतिकातः शारिबाद्यसवं चषके स्थापयन्)*

रामदासः — अम्ब ! इदं गृहौषधं सेवस्व । *(पाययितुं प्रयतते)*

वैद्यः — *(प्रतिषेधं कुर्वन्)* नानेन प्रयोजनम्, अहं रोगनिदानं पश्यामि ।

रामदासः – कथं पश्यसि ?

वैद्यः — अनेन मापकेन । *(इति हृदयस्पन्दनमापकेन परीक्ष्य)* अहो देहे रक्तमेव स्वल्पम् । चर्माच्छादितानि अस्थीनि एव दृश्यन्ते । शरीरे मांसलेशोऽपि नास्ति ।

गान्धी — किं कुर्याः ?

वैद्यः — *(निपुणं विमृश्य)* रोगः जीर्णतां गतः । गुलिकाभिरपि निवारयितुं न शक्यते ।





रामदासः — *(ससम्भ्रमम्)* माता मे दुर्बला जाता चलितुमपि न समर्था ।

मणिलालः — भोः तात वैद्य ! कथमपि मातरं प्राणान्तकाद् व्याधेः विमोचय ।

गान्धी — किं कर्तव्यं विचिन्त्यताम् ।

वैद्यः — *(निपुणः परिशील्य)* शस्त्रचिकित्सया रोगकणाः निर्मूलनीयाः ।

गान्धी — *(जनान्तिकम्)* अयि वैद्यसहोदर ! शस्त्रचिकित्सायां मादकद्रवप्रयोगः न करणीयः । इयं प्रतिज्ञा कार्या ।

वैद्यः — यथासम्भवं प्रयतिष्ये ।

गान्धी — दीयतां मे प्रतिश्रयः ।

वैद्यः — *(स्वगतम्)* कीदृशोऽयं दृढाग्रही । किमिदं सम्भवम् ? *(जनान्तिकम्)* सा यदङ्गीकरोति तत्करवाणि ।

गान्धी — कदापि नाहमङ्गीकरोमि । कस्तूरिबायाः यद्यभिमतं,नास्ति निर्बन्धः ।

वैद्यः — *(स्वगतम्)* कीदृशी हृदयविशालता गान्धिनः ! *(जनान्तिकम्)* अस्ति तथैव प्रतिशृणोमि । (इति हस्ते हस्तं विधाय प्रतिवचनं दत्तवान्)

गान्धी — *(स्वगतम्)* अस्तु, दक्षिणाफ्रिकादेशस्य स्वातन्त्र्यसंग्रामे सत्याग्रहाय जान्सबर्गनगरं साधयामि । *(प्रकाशम्)* अयि ! मणिलाल ! त्वरतां यात्रायै ।

मणिलालः — यदाज्ञापयति पिता । मातुः सेवाम् ?

गान्धी — रामदासः अनुपश्यति ।

*(इत्युक्त्वा मणिलालेन सह निष्क्रान्तः)*

धात्री — *(वीक्ष्य)* रक्तवस्त्रो भूयो बोभूयते । तस्य अवरोधः कर्तव्यः । भवतु पट्टिकया बध्नामि । *(इति तथा करोति)*

वैद्यपत्नी — अरे रे ! शनैः शनैः मुखे पाण्डिमा जायते । किं कर्तव्यताविमूढा अस्मि । *(इति चिन्तां नाटयन्ती)* अस्तु, आर्यपुत्रं भिषग्वरं समाह्वयामि । *(इति ध्वनियन्त्रद्वारा सन्दिशति)*

रामदासः — *(दृष्ट्वा)* अहो ! भिषग्वरः समायातः ।

वैद्यः — किं जातम् ?

धात्री — रक्तधारा परिस्रवति ।

वैद्यः — *(निपुणं परीक्ष्य)* सद्यः बीर् नामकं मद्यं सेवनीयमनया ।

वैद्यपत्नी — अस्ति शीतलपेटिकायाम् । आनयामि । *(इति गच्छति अत्रान्तरे मणिलालेन सह गान्धी प्रविशति)*

मणिलालः — तात ! प्रत्यासन्नं वैद्यगृहम् ।

गान्धी — अस्तु पश्येम कस्तूरिबाम् ।

**सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ।**

**(One who is committed to the path of truth and righteousness is forever free from the fear of death)**

# तिरुपतिराष्ट्रियसंस्कृतविद्यापीठे नवदशदीक्षान्तसमारोहे
# मुख्यातिथीनां मान्यानाम्
# आचार्य एम्.ए.लक्ष्मीताताचार् महाभागानां
# सन्देशभाषणम्

स्थानम् - तिरुपतिः, आन्ध्रप्रदेशः - ५१७ ५०७
दिनाङ्कः - ०१.०२.२०१६


**RASHTRIYA SANSKRIT VIDYAPEETHA**

(University established under section 3 of UGC Act, 1956)

NAAC Accredited & UGC Sponsored Centre of Excellence for Traditional Sastras

**TIRUPATI - A.P. 517 507**

**राष्ट्रियसंस्कृतविद्यापीठम्**

(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)

विश्वविद्यालयानुदानायोगेन पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितम्

तिरुपतिः – ५१७ ५०७ (आं.प्र.)

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)

विश्वविद्यालयानुदानायोगेन पारम्पारिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितम्

## नवदशदीक्षान्तसमारोहः

### महामहोपाध्यायः

आचार्याः एम्.ए.लक्ष्मीताताचार् महाभागाः
श्री श्री श्री तत्त्वविदानन्दस्वामिनः
ब्रह्मश्री के.सत्यवागीश्वरघनपाठिमहाभागाः
ब्रह्मश्री कोम्पेल्ल सत्यनारायणमहाभागाः

### वाचस्पतिः

ब्रह्मश्री गोपावझल बालसुब्रह्मण्यशास्त्रिमहाभागाः
आचार्याः वरदाचारियर् कण्णन् महाभागाः
डा.पप्पु वेणुगोपालराव् महाभागाः

सम्मानोपाधिसमर्पणम्

श्रीमन्मथ–माघ–कृष्ण–अष्टमी–सोमवासरे–पूर्वाह्णे १०:०० वादने

1/2/2016

# तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे नवदशदीक्षान्तसमारोहे कुलपतीनां आचार्य हरेकृष्णशतपथिमहोदयानां

# स्वागतभाषणं विवरणञ्च

स्थानम् - तिरुपतिः, आन्ध्रप्रदेशः - ५१७ ५०७
दिनाङ्कः - ०१.०२.२०१६


**RASHTRIYA SANSKRIT VIDYAPEETHA**
(University established under section 3 of UGC Act, 1956)
NAAC Accredited & UGC Sponsored Centre of Excellence for Traditional Sastras
**TIRUPATI - A.P. 517 507**

**राष्ट्रियसंस्कृतविद्यापीठम्**
(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
विश्वविद्यालयानुदानायोगेन पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितम्
तिरुपतिः – ५१७ ५०७ (आं.प्र.)

# विंशः दीक्षान्तसमारोहः

श्रीदुर्मुख-माघ-कृष्ण-द्वादशी-गुरुवासरे- पूर्वाह्णे १०:०० वादने

## कार्यक्रमविवरणम्

# 20th CONVOCATION

23-02-2017

10:00 a.m. to 12:30 noon

**Proceedings**

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "ए" श्रेण्या पुनर्मानितः

विश्वविद्यालयानुदानायोगेन पारम्पारिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितः

**RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI**

(University established under section 3 of UGC Act, 1956)

NAAC Re-Accredited at A grade &

UGC Sponsored Centre of Excellence for Traditional Sastras

# राष्ट्रियसंस्कृतविद्यापीठस्य विंशे दीक्षान्तसमारोहे मुख्यातिथीनां मान्यानाम् उच्चतमन्यायालयस्य न्यायाधीशचराणां श्री बि.एन्. श्रीकृष्णमहाभागानां दीक्षान्तसन्देशभाषणम्

तिरुपतिः, आन्ध्रप्रदेशः - ५१७ ५०७

दिनाङ्कः - २३.०२.२०१७

## राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा “ए” श्रेण्या पुनर्मानितः

विश्वविद्यालयानुदानायोगेन पारम्पारिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितः

**RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI**

(University established under section 3 of UGC Act, 1956)

NAAC Re-Accredited at A grade &

UGC Sponsored Centre of Excellence for Traditional Sastras

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "ए" श्रेण्या पुनर्मानितः
विश्वविद्यालयानुदानायोगेन पारम्पारिकशास्त्रसमुत्कर्षकेन्द्रत्वेन परिगणितः

## विंशः दीक्षान्तसमारोहः

### महामहोपाध्यायः

**पण्डितश्रीजगन्नाथशास्त्रितैलङ्गमहोदयाः**
**ब्रह्मश्री डा.चिन्तलपाटि पूर्णानन्दशास्त्रिवर्याः**
**ब्रह्मश्री नल्लगोण्ड पुरुषोत्तमशर्ममहाशयाः**

### वाचस्पतिः

**ब्रह्मश्री सामवेदं वेङ्कटषण्मुखशर्ममहाभागाः**
**डा.चान्दकिरण सलूजामहाशयाः**

**सम्मानोपाधिसमर्पणम्**

श्रीदुर्मुख-माघ-कृष्ण-द्वादशी-गुरुवासरे-पूर्वाह्णे १०:०० वादने

23/2/2017

# राष्ट्रियसंस्कृतविद्यापीठस्य एकविंशे दीक्षान्तसमारोहे मुख्यातिथीनां मान्यानाम् भारतप्रधानमन्त्रिणः आर्थिकपरामर्शदातृपरिषदः अध्यक्षाणां, नीति-आयोगस्य सदस्यानां, तथा संस्कृतविदुषां श्रीविवेकदेवरायमहोदयानां दीक्षान्तसन्देशभाषणम्

तिरुपतिः, आन्ध्रप्रदेशः - 517 507

दिनाङ्कः - 05.02.2018

## राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

(मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "ए" श्रेण्या पुनः प्रत्यायितः

**RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI**

(Deemed to be University)

NAAC Re-Accredited with CGPA of 3.71 on 4 point scale at 'A' Grade

# राष्ट्रियसंस्कृतविद्यापीठस्य एकविंशे दीक्षान्तसमारोहे कुलपतीनाम् आचार्य वि.मुरलीधरशर्ममहाभागानां स्वागतभाषणं विवरणञ्च

तिरुपतिः, आन्ध्रप्रदेशः - 517 507

दिनाङ्कः - 05.02.2018

## राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

(मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "ए" श्रेण्या पुनः प्रत्यायितः

**RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI**

**(Deemed to be University)**

**NAAC Re-Accredited with CGPA of 3.71 on 4 point scale at 'A' Grade**

# राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

मानितविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "ए" श्रेण्या पुनः प्रत्यायितः

## एकविंशः दीक्षान्तसमारोहः

### महामहोपाध्यायः

ब्रह्मश्री बल्लपदवु माधव उपाध्यायमहोदयाः

श्रीमन्तः श्रीभाष्यं विजयसारथिमहोदयाः

ब्रह्मश्री शलाक रघुनाथशर्ममहोदयाः

### वाचस्पतिः

डा. करणम् अरविन्दरावमहोदयाः

डा. मर्रि कृष्णारेड्डिमहोदयाः

सम्मानोपाधिसमर्पणम्

श्रीहेमलम्बि–माघ–कृष्ण–पञ्चमी–सोमवासरे–पूर्वाह्णे १०:०० वादने

05/02/2018

# RASHTRIYA SANSKRIT VIDYAPEETHA

(University Estd. u/s. 3 of UGC Act, 1956)

TIRUPATI - 517 507 - A.P.



ACADEMIC BUILDING

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

# HAND BOOK

2016-2017

# राष्ट्रियसंस्कृतविद्यापीठम्

## तिरुपति

## प्रार्थना

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

यं शैवास्समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षःस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धिनीम् ।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥

समस्तजननीं वन्दे चैतन्यस्तन्यदायिनीम् ।
श्रेयसीं श्रीनिवासस्य करुणामिव रूपिणीम् ॥

विना वेङ्कटेशं न नाथो न नाथः सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे ! वेङ्कटेश ! प्रसीद प्रसीद प्रियं वेङ्कटेश ! प्रयच्छ प्रयच्छ ॥

श्रीमन्! कृपाजलनिधे! कृतसर्वलोक! सर्वज्ञ! शक्त! नतवत्सल! सर्वशेषिन्!
स्वामिन् ! सुशील ! सुलभाश्रितपारिजात ! श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥

सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाक् भवेत् ॥

ॐ शान्तिः शान्तिः शान्तिः

# डिण्डिमकविराजनाथप्रणीतस्य सालुवाभ्युदयमहाकाव्यस्य

# पाठसम्पादनं सविशेषमध्ययनञ्च

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य विद्यावारिधिः (Ph.D.) इत्युपाध्यङ्गतया

रचयिष्यमाणस्य शोधप्रबन्धस्य प्रस्तावः

## शोधसंक्षिप्तिका - SYNOPSIS


मार्गनिर्देष्टा

डॉ. सिहेच्. नागराजु,

सहाचार्यः,अनुसन्धानप्रकाशनविभागः

अनुसन्धाता

यस्.रामतिरुमलरेड्डिः


साहित्यविभागः

## राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

विश्वविद्यालयानुदानायोगस्य १९५६ अधिनियमस्य तृतीयानुच्छेदेन संस्थापितः विश्वविद्यालयः

तिरुपतिः, आन्ध्रप्रदेशः - ५१७५०७

२०१७ - १८

# "रघुनाथाचार्यविरचितस्य रत्नसंग्रहकाव्यस्य सम्पादनमध्ययनञ्च"

***[Raghunathacharyavirachitasya Ratnasangraha Kavyasya Sampadanam Adhyayanancha]***

राष्ट्रियसंस्कृतविद्यापीठस्य (मानितविश्वविद्यालयस्य)
संस्कृतं (मातृकाशास्त्रं तथा हस्तलेखविज्ञानम्) इति विभागे विशिष्टाचार्यः
(M.Phil.in Sanskrit Manuscriptology and Paleography)
इत्युपाध्यर्थं प्रस्तुतः लघुशोधप्रबन्धः


मार्गनिर्देष्टा
**डॉ.सीहेच्.नागराजु**
सहायकाचार्यः, प्रकाशनानुसन्धानविबागः

अनुसन्धाता
**मिथुन कुमार शतपथी**



**राष्ट्रियसंस्कृतविद्यापीठम्**

विश्वविद्यालयानुदानायोगस्य 1956 धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्यां प्रत्यायितम्)
तिरुपतिः - 517 507 (आ.प्र.)

**2016-17**

विकसितवर्णमालामयी च। अस्यां लिप्यां पाण्डुलिपयः, शिलालेखाश्च प्राप्यन्ते। माकिं ५,००,००० मातृकाः अस्यां लिप्यां सन्तीति सर्वेक्षणेन ज्ञातम्। दक्षिणभारतीयमातृकागारेषु अस्यां लिप्यामेव लिखिताः मातृकाः प्रधानतया उपलभ्यन्ते। जावा, सुमात्रा, चंपा, काम्बोडिया, मलय, बाली, श्रीलङ्का द्वीपेषु अपि पल्लवग्रन्थलिप्यां लिखिताः शिलालेखाः प्राप्ताः विद्यन्ते।

